॥बाल॥
॥१॥

॥श्रीगणेशाय नमः॥ अथ बालबोधो
लिख्यते॥ विघ्नध्वांतं नमस्कृत्य देविं वै
ऽसरस्वतिं॥ गुरुं च देवतानां च भक्त्या
हार्द्दनोमया॥ १॥ नानाशास्त्र स

॥राम॥
॥१॥

॥श्री गणेशाय नमः॥ शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं॥ प्रसन्नव
दनं ध्यायेत् सर्वविघ्नोपशांतये॥१॥ वत्सलो
का दिह प्राप्त नार
दंभ गव न्नि य
हृ स्मा न त्वा
समा यांते नप कु
मुनयो मुदा॥२॥ नैमिषाने षद्नै
ऋषयः शौनकादयः॥ देवर्षिमुपसंगम्य पप्रच्छुरिदमादृताः॥३॥

१

मि

नौ

॥ऋषय ऊचुः॥ब्रह्मकेनप्रकारेणसर्वपापक्षयोभवेत्॥विनादानेनतप
साविनातीर्थैर्विनामखैः॥६॥विनावेदैर्विनाध्यानैर्विनाचेंद्रियनिग्रहैः॥विना
शास्त्रसमूहैश्चकथंमुक्तिरवाप्यते॥७॥देवाधिदेवदेवेशःस्थितस्तत्रपासिशेकरः
कश्यमाराधयेदेवंजपध्यानपरायणाः॥८॥नारदउवाच॥इदमेवपुरापृष्टःपार्व
त्यापरमेश्वरः॥यदुवाचश्रृणुध्वंहिकथयामिसुविस्तरात्॥९॥कैलासशिख
रासीनंदेवदेवंजगद्गुरुं॥प्रणिपत्यमहादेवंपर्यपृच्छदुमाप्रिया॥१०॥पार्वत्युवा
च॥भगवन्त्वंपरोदेवःसर्वज्ञःसर्वपूजितः॥त्वंलिंगमर्च्यतेदेवैर्ब्रह्मस्मृया
दिकैरपि॥११॥त्वत्तोलभंतेभिमतांसिद्धिंसर्वंवरप्रद॥त्वंजन्ममृत्युरहिताःस्वयं

भूः सर्वशक्तिमान् ॥ १० ॥ सदा ध्यायसि किं स्वामिन् दिग्वासास्त्वं नोत्तकः
तपश्चरसि कस्मात्त्वं जटिलो भस्मधूसरः ॥ ११ ॥ किं वा जपसि देवेश परं कौतू-
हलं हि मे ॥ अनुग्राह्या प्रिया तेस्मि तत्त्वं कथय सुव्रत ॥ १२ ॥ श्रीमहादेव उ-
वाच ॥ नेदं कस्यापि कथितं गोपनीयमिदं मम ॥ किं तु वक्ष्यामि ते भद्रे त्वं मे भक्ता-
॥ २ ॥ स्ति प्रिया सि मे ॥ १३ ॥ पुरा सत्ययुगे देवि विष्णुद्वेमतयोखिलाः ॥ यज्ञैर्हि विष्णु- ॥ २ ॥
मेवैकं ज्ञात्वा सर्वेश्वरेश्वरं ॥ १४ ॥ प्रयान्ति परमामृद्धिमैहिकामुष्मिकीं परां
॥ यां न प्राप्यासुरैः सर्वे रक्षयाल्केशवर्जिताः ॥ १५ ॥ नूतां गतिं प्रपद्यंते विना
भागवतान्नरान् ॥ मन्मुखादपि संस्तुत्य देवा विष्णुं वहिर्मुखाः ॥ १६ ॥ वेदैः पु-

रागैः सिद्धान्तैर्भिन्नैर्विभ्रांतचेतसः ॥ निःस्वयं नाधिगच्छंति किं तत्त्वं किं परं पदं ॥ १७ ॥
तुलापूरुषदानाद्यैरश्वमेधादिभिर्मखैः ॥ वाराणसीप्रयागादितीर्थस्नानादि
भिः प्रिये ॥ १८ ॥ गयाश्राद्धादिभिः पित्रैर्वेदपाठादिभिर्जपैः ॥ तपोभिरुग्रैर्नि
यमैर्भूतदयादिभिः ॥ १९ ॥ गुरुशुश्रूषणैः सत्यैर्वर्णाश्रमोदितैः ॥ ज्ञा
नध्यानादिभिः स[illegible]म्यक्कारितैर्जन्मजन्मभिः ॥ २० ॥ न यांति तत्परं स्था
यो विभुं सर्वेश्वरेश्वरं ॥ सर्वभावैरनाश्रित्य पुराणपुरुषोत्तमं ॥ २१ ॥ अनन्य
गतयो मर्त्या भोगिनो विपरीत[illegible]याः ॥ ज्ञानवैराग्यरहिता ब्रह्मचर्यादिवर्जि
ताः ॥ २२ ॥ सर्वधर्मोज्झिता विष्णोर्नाममात्रैकजल्पकाः ॥ सुखेन यां गतिं

ये मै

यांतिनत्तां सर्वेपि धार्मिकाः ॥२३॥ स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जा
तु चित ॥ सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः ॥२४॥ किंतु ब्रह्मादि
भिर्देवैः पुरा दृष्ट्वातिरहस ॥ नियमं विष्णुना मे च यथेष्टपदमागताः ॥२५॥
मल स्वाचात्मानं पूजां सम्यगाराधितो हरिः ॥ मया चास्मादपि श्रेष्ठो दा
॥३॥ कृता हि कृतात्मना ॥२६॥ ततः साक्षाज्जगन्नाथः प्रसन्नो भक्तवत्सलः ॥ ॥२॥
स्वांशांशेनात्मनैवेतां पूजयामास केशवः ॥२७॥ देवान्पितॄन्द्विजान
न्यान्कव्याद्यैः करुणामयः ॥ ततः प्रभृति पूज्यंते त्रैलोक्ये सचराचरे ॥
मांचोवाच यथा मत्तः पूज्यः श्रेष्ठो भविष्यसि ॥ त्वामाराध्य सर्वथा शंभो मत्ती

स्वामिवंतव ॥२८॥ द्वापरादौ युगे भूत्वा कलया मानुषादिषु ॥ स्वा
गमैः कल्पितैस्त्वंचजनान्मोहितमुरान्नकुरु ॥३०॥ मांच गोपयपेनस्या
त्सृष्टिरेषोत्तरोत्तरा ॥ ततस्तं प्रोक्तिपत्याहमवोचपरमेश्वरः ॥३१॥ श्रीभ
गवानुवाच ॥ ब्रह्महत्यासहस्रस्य पापंशाम्येत्कथंचन ॥ नपुनस्त्वं दर्शना
नेकल्पकोटिशतैरपि ॥३२॥ यस्मान्मयाकृतास्त्वं ज्ञोपावद्रः स्यांकथंहर
स्पृक्षोति सर्व्वपापानि तन्मेवदस्व सुरेश्वर ॥३३॥ श्रीभगवानुवाच ॥ सदाना
मसहस्रंमे पावनंमत्यदावह ॥ तत्पठन्नुदिनेशंभो सर्वं स्तूय यदीच्छसि ॥३४॥
श्रीमहादेवउवाच ॥ तमेवतपसानित्यं भजामिस्तौमिचिंतये ॥ तेनाहिती

यमहिमानं जगत्पूज्योऽस्मि पार्वति ॥ ३५ ॥ पार्वत्युवाच ॥ तन्मे कथय देवेश
यथाहमपि शंकर ॥ सर्वेश्वरी निरूपमा तवस्या महं भी प्रभो ॥ ३६ ॥ श्री म
हादेव उवाच ॥ साधु साधु वयानं विष्णोर्भगवतः प्रिये ॥ नान्मास
मन्त्रं वक्ष्यामि मुक्त्यै त्रैलोक्यमुक्तिदं ॥ ३७ ॥ मंत्रः ॥ ॐ नमो नारायणाय
॥ ४ ॥ पुरुषाय महात्मने ॥ विशुद्धसत्वधिष्ण्याय महाहंसाय धीमहि ॥ ३८ ॥ ॥ ४ ॥
ॐ अस्य श्रीविष्णोर्मन्त्रस्य महत्स्य श्रीमहादेवनूर्पी नारायणऋषिरनुष्टु
प्छंदः ॥ विष्णुरूपी परमात्मा देवता ॐ हं बीजं सोहं इति शक्तिः ॥ ॐ ह्रीं कीलकं
[illegible] पं इत्यंगुष्ठाभ्यां नमः ॥ मरुत्प्रकृतिभिस्तर्जनीभ्यां नमः

विष्णुदेव

महावराह इति मध्यमाभ्यां नमः ॥ सूर्यवंशध्वज इत्यनामिकाभ्यां नमः ॥ ब्रह्मादिकाम्यलालित्य जगदाश्चर्यशेशव इति कनिष्ठिकाभ्यां नमः ॥ पार्थार्थ खंडिताशेष इति करतलकरपृष्ठकाभ्यां नमः ॥ ॐ वासुदेवः परं ब्रह्म इति हृदयाय नमः ॥ मूलप्रकृतिरिति शिरसे स्वाहा ॥ महावराह इति शिखायै वषट् ॥ सूर्यवंशध्वज इति कवचाय हुं ॥ ब्रह्मादिकाम्यलालित्य इति नेत्रत्रयाय वौषट् ॥ पार्थार्थ खंडिताशेष इत्यस्त्राय फट् ॥ दिव्यास्त्र इति सर्वमंत्रपापालक्ष्य हृद्यार्थ मोक्षार्थं श्रीविष्णोर्नामसहस्रजपे विनियोगः ॥ अथ ध्यानं ॥ ॐ ॥ विष्णु भास्वत्किरीटांगदवलयगलाकल्पहारोदरांघ्रि श्रोणीभूषं सुवक्षो

मणिमकरमहाकुंडलामंडितांसं।हस्तोद्यच्चक्रशंखांबुजगद
ममलपीतकौशेयवासंविद्योतज्ञासमुद्यद्दिनकरसदृशंपद्मसंस्थन
मामि॥३५॥ॐवासुदेवः परब्रह्म परमात्मा परात्परः। परंधाम परंज्योतिः
परंतत्त्वं परंपदं॥४०॥परः शिवः परोध्येयः परंज्ञानं परा गतिः। परमार्थः ॥५॥
॥५॥ परंश्रेयः परानंदः परोदयः॥४१॥परोव्यक्तात्परंव्योम परर्द्धिः परमेश्वरः।
निरामयो निर्विकारो निर्विकल्पो निराश्रयः॥४२॥निरंजनो निरालंबो नि
र्लेपो निरविग्रहः॥निर्गुणो निष्कलोनंतो भयोचिंत्यो चलच्युतः॥४३॥
अतींद्रियोमितोपारोनीशोनीहोव्ययोक्षयः॥सर्वज्ञः सर्वगः सर्वः सर्वदः सर्व

भावनः ॥४४॥ सर्व्वशास्ता सर्व्वसाक्षी पूज्यः सर्व्वस्य सर्व्वदृक् ॥ सर्व्वशक्तिः सर्व्वसा
रः सर्व्वात्मा सर्व्वतोमुखः ॥ ४५ ॥ सर्व्ववासः सर्व्वरूपः सर्व्वादिः सर्व्वदुःखहा ॥ सर्व्वा
र्थः सर्व्वतोभद्रः सर्व्वकारणकारणं ॥ ४६ ॥ सर्व्वातिशायकः सर्व्वाध्यक्षः सर्व्वे
श्वरेश्वरः ॥ षड्विंशको महाविष्णुर्महागुह्यो महाहरिः ॥ ४७ ॥ नित्योदितो
नित्ययुक्तो नित्यानंदः सनातनः ॥ मायापतिर्योगपतिः कैवल्यापतिरात्म
भूः ॥ ४८ ॥ जन्ममृत्युजरातीतः कालातीतो भवातिगः ॥ पूर्णः सत्यः शुद्ध
बुद्धस्वरूपो नित्यचिन्मयः ॥ ४९ ॥ योगिप्रियो योगमयो भवबंधैकमोच
कः ॥ पुराणपुरुषः प्रत्यक्चैतन्यः पुरुषोत्तमः ॥ ५० ॥ वेदान्तवेद्यो दुर्ज्ञेयस्ता

पञ्चपविवर्जितः॥ ब्रह्मविद्याश्रयोनघः स्वप्रकाशः स्वयंप्रभुः॥५१॥ सर्वो
पेय उदासीनः प्रणवः सर्वतः समः॥ सर्वानवद्यो दुःप्रापस्तारीयस्तम
सः परः॥५२॥ कूटस्थः सर्वसंश्लिष्टो वाङ्मनोगोचरातिगः॥ संकर्षणः
सर्वहरः कालः सर्वभयंकरः॥५३॥ अनुल्लंघ्यः सर्वगतिर्महारुद्रो दुरास
॥६॥ दः॥ मूलप्रकृतिरानंदः प्रद्युम्नो विश्वमोहनः॥५४॥ महामायो विश्ववी ॥६॥
जं परशक्तिः सुखैकभूः॥ सर्वकाम्योनंतलीलः सर्वभूतवशंकरः॥५५॥
अनिरुद्धः सर्वजीवो हृषीकेशो मनस्पतिः॥ निरुपाधिप्रियो हंसोक्षरः
सर्वनियोजकः॥५६॥ ब्रह्मप्राणेश्वरः सर्वभूतभृद्देहनायकः॥ क्षेत्रज्ञः

प्रकृतिस्वामी पुरुषो विश्वसूत्रप्रवर्तकः ॥५७॥ श्रुतर्यो मीनिष्प्रामान्तः साक्षीनि
र्गुण ईश्वरः ॥ योगिगम्यः पद्मनाभः शेषशायी श्रियः पतिः ॥५८॥ श्रीस
दोपास्यपादाब्जो नित्यश्रीः श्रीनिकेतनः ॥ नित्यंवक्षःस्थलस्थश्रीः श्रीनि
धिः श्रीधरो हरिः ॥५९॥ वश्यश्रीर्निश्चलश्रीदो विष्णुः क्षीराब्धिमंदिरः ॥
कौस्तुभोद्भासितोरस्को माधवो जगदार्तिहा ॥६०॥ श्रीवत्सवक्षा निःसीमकल्या
णगुणभाजनं ॥ पीताम्बरो जगन्नाथो जगत्त्राता जगत्पिता ॥६१॥ जगद्बंधुर्जग
त्स्रष्टा जगद्धाता जगन्निधिः ॥ जगदेकस्फुरद्वीर्यो नाहंवादी जगन्मयः ॥६२॥
सर्वाश्चर्यमयः सर्वसिद्धार्थः सर्वपारजित ॥ सर्वामोघोद्यमो ब्रह्मरुद्राद्युत्कृ

चेतन ॥६३॥ शंभोः पितामहो ब्रह्मपिता शक्राद्यधीश्वरः ॥ सर्वदेवप्रियः
सर्वदेवमूर्तिरनुत्तमः ॥६४॥ सर्वदेवैकशरणः सर्वदेवैकदेवतम् ॥ यज्ञभु
ग्यज्ञफलदो यज्ञेशो यज्ञभावनः ॥६५॥ यज्ञत्राता यज्ञपुमान्वनमाली द्वि
जप्रियः ॥ द्विजैकमानदो विप्रकुलदेवोऽसुरान्तकः ॥६६॥ सर्वदुष्टान्तकृत्सर्व
॥७॥ सज्जनानन्यपालकः ॥ सप्तलोकैकजठरः सप्तलोकैकमण्डनः ॥६७॥ सृ ॥७॥
ष्टिस्थित्यन्तकृच्चक्री शार्ङ्गधन्वा गदाधरः ॥ शंखभृन्नन्दकी पद्मपाणि
र्गरुडवाहनः ॥६८॥ अनिर्देश्यवपुः सर्वः सर्वत्रैलोक्यपावनः ॥ अनन्त
कीर्तिर्निःसीमपौरुषः सर्वमंगलः ॥६९॥ सूर्यकोटिप्रतीकाशो यमकोटि

दुरासदः ॥ ब्रह्मकोटिजगत्स्रष्टा वायुकोटिमहाबलः ॥ ७० ॥ कोटीन्दुजगदानं-
दी शंभुकोटिमहेश्वरः ॥ कुबेरकोटिलक्ष्मीवान् शक्रकोटिविलासवान् ॥ ७१ ॥
कंदर्पकोटिलावण्यो दुर्गाकोटिरिमर्दनः ॥ समुद्रकोटिगंभीरस्तीर्थकोटिस-
माह्वयः ॥ ७२ ॥ हिमवत्कोटिनिःकंपः कोटिब्रह्माण्डविग्रहः ॥ कोट्यश्वमेधपाप-
घ्नो यज्ञकोटिसमार्चनः ॥ ७३ ॥ सुधाकोटिः स्वास्थ्यहेतुः कामधुक्कोटिकामदः ॥
ब्रह्मविद्याकोटिरूपः शिपिविष्टः शुचिश्रवाः ॥ ७४ ॥ विश्वंभरस्तीर्थपादः पुण्य-
श्रवणकीर्तनः ॥ आदिदेवो जगज्जैत्रो मुकुंदः कालनेमिहा ॥ ७५ ॥ वैकुंठोनंत-
माहात्म्यो महायोगेश्वरोत्सवः ॥ नित्यतृप्तो लसद्भावो निःशंको नरकांतकः ॥ ७६ ॥

दीनानाथैकशरणं विश्वैकव्यसनापहः जगत्कृपाक्षमो नित्यं कृपालुः स
ज्जनाश्रयः ॥७७॥ योगेश्वरः सदोदीर्णो वृद्धिक्षयविवर्जितः ॥ स्वर्घोषक्रो
विश्वरेता प्रजापतिशताधिपः ॥७८॥ शङ्खचक्राङ्कितपदः शंभुवक्त्रो ह्वषाम
गः ॥ सूर्यसोमेन्द्रगो विश्वभोक्ता सर्वस्यपारगः ॥७९॥ जगत्सेतुर्धर्मसेतुर्धरो
॥१८॥ विश्वधुरंधरः ॥ निर्ममखिलल्लोकेशो निःसंगोद्भुतभोगवान् ॥८०॥ विश्वकर्मा ॥१८॥
योवश्यविश्वो विष्वक्सेनः सुरोत्तमः ॥ सर्वश्रेयः पतिर्दिव्यानर्घ्यभूषणभू
षितः ॥८१॥ सर्वलक्षणलक्षण्यः सर्वदैत्येन्द्रदर्पहा ॥ समस्तदेवसर्वस्वं सर्व
दैवतनायकः ॥८२॥ समस्तदेवकवचं सर्वदेवशिरोमणिः ॥ समस्तदेवतादु

र्णः प्रपन्नाशनिपंजरः ॥८३॥ समस्तभयभिन्नामा भगवान्विष्टरश्रवाः ॥ विभुः
सर्वहितोदर्को हतारिः सुगतिप्रदः ॥८४॥ सर्वदैवतजीवेशो ब्राह्मणादिनियोज
कः ॥ ब्रह्मशंभुपरार्द्धायुर्ब्रह्मज्येष्ठः शिशुः स्वराट् ॥८५॥ विराड्भक्तपराधीनः
स्तुत्यः स्तोत्रार्थसाधकः ॥ परार्थकर्ता कृत्यज्ञः स्वार्थकृत्यसदोज्झितः ॥८६॥
सदानंदः सदाभद्रः सदाशांतः सदाशिवः ॥ सदाप्रियः सदातुष्टः सदापुष्टः सदा
र्चितः ॥८७॥ सदापूतपावनाग्र्यो वेदगुह्यो वृषाकपिः ॥ सहस्रनामा त्रियुगश्च
तुर्मूर्तिश्चतुर्भुजः ॥८८॥ भूतभव्यभवन्नाथो महापुरुषपूर्वजः ॥ नारायणो मुंजा
केशः सर्वयोगविनिःसृतः ॥८९॥ वेदसारो यज्ञसारः सामसारस्तपोनिधिः ॥

साध्यः श्रेष्ठः पुराणर्षिर्निष्ठा शांतिः परायणं ॥ ९० ॥ शिवत्रिशूलविध्वंसी श्रीकं-
ठैकवरप्रदः ॥ नरः कृष्णो हरिर्धर्म्मनंदनो धर्म्मजीवनः ॥ ९१ ॥ आदिकर्त्ता सर्वस-
त्यः सर्वस्त्रीरत्नदर्पहा ॥ त्रिकालजितकंदर्प उर्वशीसृग्मुनीश्वरः ॥ ९२ ॥
आद्यः कविर्हयग्रीवः सर्ववागीश्वरेश्वरः ॥ सर्वदेवमयो ब्रह्मगुरुर्वागीश्वरीपतिः ॥ ९३ ॥
॥ ९४ ॥ ॥ ९३ ॥ अनंतविद्याप्रभवो मूलाविद्याविनाशकः ॥ सार्वज्ञदो जगज्जाड्यनाशको
मधुसूदनः ॥ ९४ ॥ अनेकमंत्रकोटीशः शब्दब्रह्मैकपारगः ॥ आदिविद्वान्वे-
दकर्त्ता वेदात्मा श्रुतिसागरः ॥ ९५ ॥ ब्रह्मार्थवेदाहरणः सर्वविज्ञानजन्मभूः ॥
विद्याराजो ज्ञानमूर्त्तिर्ज्ञानसिंधुरखंडधीः ॥ ९६ ॥ मत्स्यदेवो महाशृंगो जगद्बी-

उवहित्रपृष्टकः ॥ लीलाव्याप्ताखिलांभोधिश्चतुर्वेदप्रवर्तकः ॥ ९७ ॥ आदिकूर्मो
खिलाधारस्तृणीकृतजगद्भरः ॥ अमरीकृतदेवौघः पीयूषोत्पत्तिकारणं ॥ ९८ ॥
आत्माधारो धराधारो यज्ञांगो धरणीधरः ॥ हिरण्याक्षहरः पृथ्वीपतिः श्राद्धा
दिकल्पकः ॥ ९९ ॥ समस्तपितृभीतिघ्नः समस्तपितृजीवनं ॥ हव्यकव्यैकभु(
ग्)हव्यकव्यैकफलदायकः ॥ १०० ॥ रोमांतर्लीनजलधिः क्षोभिताशेषसागरः
महावराहो यज्ञघ्नध्वंसनो याज्ञिकाश्रयः ॥ १ ॥ श्रीनृसिंहो दिव्यसिंहः सर्वारिष्टा
र्तिदुःखहा ॥ एकवीरोद्भुतबलो यंत्रमंत्रैकभंजनः ॥ २ ॥ ब्रह्मादिदुःसहज्योति
र्युगांतात्यतिभीषणः ॥ कोटिवज्राधिकनखो जगद्दुःप्रेक्ष्यमूर्तिधृक् ॥ ३ ॥

मात्रचक्रप्रमर्थनो महामातृगणेश्वरः॥ चिंत्यामोघवीर्यो द्यः समस्ता
सुरघस्मरः॥ ४॥ हिरण्यकशिपुच्छेदी कलः संकर्षणीपतिः॥ कृतांतवाहनः सद्य
समस्तभयनाशकः॥ ५॥ सर्वविघ्नांतकः सर्वसिद्धिदः सर्वपूरकः॥ समस्तपात
कध्वंसी सिद्धमंत्रादिकाक्षयः॥ ६॥ भैरवेशो हरार्तिघ्नः कालकोटिदुरासदः॥ ॥१०॥
॥१०॥ दैत्यगर्भस्रावी नामास्फुटब्रह्मांडगर्जितः॥ ७॥ स्मृतमात्राखिलत्राताद्भुतरू
पो महाहरिः॥ ब्रह्मचर्मशिरःपट्टो दिक्पालच्छिन्नांगभूषणः॥ ८॥ द्वादशाक्षशिरो
दामा तुङ्गशीर्षकनूपुरः॥ योगिनीग्रस्तगिरिजात्राता भैरवतर्जकः॥ ९॥ वीरच
केश्वरोत्युग्रो यमारिः कालशंवरः॥ क्रोधेश्वरो रुद्रचंडीपरिवारादिदुष्टभुक्॥ १०॥

सर्वात्मको भोमृत्युमृत्युः कालमृत्युनिवर्तकः ॥ असाध्यस्सर्वरोगघ्नः सर्वदुग्रहसौ
म्यकृत ॥ ११ ॥ गणेशकोटिदर्पघ्नः महाशेषगो व्रह्मा ॥ देवदानवदुर्द्दर्शो जगद्भ
यदभीषणः ॥ १२ ॥ समस्तदुर्गतित्राता जगद्भक्षकभक्षकः ॥ उग्रेशो वरमाङ्गारः
कालमूषकभक्षकः ॥ १३ ॥ अनंतायुधदोर्द्दण्डो नृसिंहो वीरभद्रजित ॥ योगि
नीचक्रगुह्येशः शक्रारिपशुमांसभुक् ॥ १४ ॥ रुद्रो नारायणो मेघरूपशंक
रवाहनः ॥ मेघरूपशिवत्राता दुष्टशक्तिसहस्रभुक् ॥ १५ ॥ तुलसीवल्लभो वी
रो वामाचारोऽखिलेष्टदः ॥ महाशिवः शिवारूढो भैरवैककपालधृक् ॥ १६ ॥
ल्लीचक्रेश्वरः शक्रादिदेवमोहनरूपदः ॥ गौरीशो भाग्यदो मायानिचिर्मा

याभयापहः ॥१७॥ ब्रह्मतेजोमयो ब्रह्मश्रीमयः स्त्रत्रयीमयः ॥ सुब्रह्मण्यो ब
लिध्वंसी वामनोदितिदुःखहा ॥१८॥ उपेन्द्रो नृपतिर्विष्णुः कश्यपान्वयमंड
नः ॥ बलिस्वराज्यदः सर्वदेवविप्रान्नदोच्युतः ॥१९॥ उरुक्रमस्तीर्थपादः त्रि
पदस्थस्त्रिविक्रमः ॥ व्योमपादः स्वपादांभःपवित्रितजगत्त्रयः ॥२०॥ ब्रह्मेशा
॥११॥ द्यभिवंद्यांघ्रिर्द्रुतधर्मांघ्रिधावनः ॥ अचिंत्याद्भुतविस्तारो विश्ववृक्षो महा ११॥
बलः ॥२१॥ राहुमूर्द्धापरांगच्छिद्भृगुपत्नीशिरोहरः ॥ पापत्रस्तः सदापुण्यो
दैत्याशानित्यखंडनः ॥२२॥ पूरितोखिलदेवेशो विश्वार्थैकावतारकृत् ॥ स्वमा
यानित्यगुप्तात्मा भक्तचिंतामणिः सदा ॥२३॥ वरदः कार्तवीर्यादिराजराज्य

त्य

प्रदेशेनवः॥ विश्वसृष्टा धर्मो मितात्मा चारो दत्तात्रेयो मुनीश्वरः॥२४॥ परशक्तिस
दाश्लिष्टो योगानंदः सदोन्मदः॥ त्वमस्ते ज्ञानितेजोऽहं त्वर मामृतपञ्चप॥२५
अनुसूयागर्भरत्नं भोगमोक्षसुखप्रदः॥ यमदग्निकुलादित्यो रेणुकाद्भुत
शक्तिकृत॥२६॥ मातृहत्यादि निर्लेपः स्कंदजिद्विप्रराज्यदः॥ सर्वक्षत्रांतकृ
त्वीरदर्प्यहाकार्तवीर्यजित॥२७॥ सप्तद्वीपावतीदाता शिवार्चकयशप्रदः॥
भीमः परशुरामश्च शिवाचार्यैकविश्वभूः॥२८॥ शिवाखिलज्ञानकोशो
भीष्माचार्याग्निदैवतः॥ द्रोणाचार्यगुरुर्विश्वजैत्रधन्वाकृतांतजित॥२९॥
अद्वितीयतपोमूर्तिर्ब्रह्मचर्यैकदक्षिणः॥ मनुः श्रेष्ठः सतां सेतुर्महीयान्

हृषमयोविराट् ॥३०॥ आदिराजःक्षितिपितासर्वरत्नैकदोहकृत ॥ पृथुर्जन्मा
द्येकदक्षोगी:श्रीकीर्तिस्वयंभृतः ॥३१॥ जगद्वृत्तिप्रदश्चक्रवर्तिश्रेष्ठोद्वया
स्त्रधृक् सनकादिमुनिप्राप्यभगवद्भक्तिवर्द्धनः ॥३२॥ वर्णाश्रमादिधर्म्मा
णांकर्त्ताचक्ताप्रवर्तकः ॥ सूर्यवंशध्वजोरामोराघवःसद्गुणार्णवः ॥३३॥
॥१२॥ काकुत्स्थोवीरराडार्योराजाधर्मधुरंधरः ॥ नित्यःस्वस्थाश्रयःसर्वभद्रग्राही ॥१२॥
शुभैकदृक् ॥३४॥ नररत्नंरत्नगर्भोधर्माध्यक्षोमहानिधिः ॥ सर्वश्रेष्ठा
श्रयःसर्वशास्त्रार्थग्रामवीर्यवान् ॥३५॥ जगद्धशीदाशरथिःसर्वरत्नाश्र
योनृपः ॥ समस्तधर्म्मसूः सर्वधर्म्मद्रष्टाखिलार्त्तिहृत ॥३६॥ अतीन्द्रोज्ञा

तविज्ञानपारदृश्वा दृढमोबुधिः ॥ सर्वप्रकृष्टः शिष्टेष्टो हर्षशोकाद्यनाकुलः
॥ ३७ ॥ पित्राज्ञात्यक्तसाम्राज्यः सपत्न्योदयनिर्भयः ॥ गुहादेशार्पितैश्वर्यः
शिवस्पृष्टजटाधरः ॥ ३८ ॥ चित्रकूटाप्तरत्नाद्रिर्जगदीशो वनेचरः ॥ यथेष्टा
मितसर्वार्त्तो देवेन्द्रतनयाक्षिहा ॥ ३९ ॥ ब्रह्मेन्द्रादिनतैषीको मारीचघ्नो विरा
धहा ॥ ब्रह्मशापहताशेषदंडकारण्यपावनः ॥ ४० ॥ चतुर्द्दशसहस्रोग्ररक्षो
घ्नैकशरैकधृक् ॥ खरारिस्त्रिशिरोहंता दूषणघ्नो जनार्द्दनः ॥ ४१ ॥ जटायु
षोग्निगतिदोगस्त्यः सर्वस्वपात्रराट् ॥ लीलाधनुःकोट्यपास्तदुंदुभ्यस्थि
महाचयः ॥ ४२ ॥ सप्ततालव्यधाकृष्टध्वस्तपातालदानवः ॥ सुग्रीवराज्य

दोहीनमननसेवाभयप्रदः॥४३॥हनुमद्रुद्रमुख्येशः समस्तकपिदेहभृते॥
सनागदैत्यबाणैकव्याकुलीकृतसंगरः॥४४॥सप्ततालैककोटिबाणैकस्पृष्टकृति
र्द्धगंधसागरः॥समुद्राद्भुतपूर्वैकबद्धसेतुर्यशोनिधिः॥४५॥असाध्यसाधको
लंकासमूलोत्कर्षदक्षिणः वरदृप्तजगद्रुल्पपौलस्त्यकुलकृंतनः॥४६॥
॥१३॥ रावणिघ्नः प्रहस्तच्छित्कुंभकर्णभिदुग्रहा॥रावणैकशिरश्छेत्तानिःशंकेंद्रैक ॥१३॥
राज्यदः॥४७॥स्वर्गास्वर्गत्वविच्छेदीदेवेंद्रानिंद्रताहरः॥रक्षोदेवत्वहृद्धर्माधर्म
त्वघ्नः पुरुष्टुतः॥नतिमात्रदशास्यारिर्दत्तराज्यविभीषणः॥सुधावृष्टिमृताशेष
स्वसैन्योज्जीवनैककृत॥४८॥देवब्राह्मणनामैकधातासर्वामरार्चितः॥ब्रह्मस्

यो इंद्ररुद्रादिदेवैश्चार्पितमतीप्रियः ॥५०॥ अयोध्याखिलराजाग्र्यः सर्वभूतमनो
हरः ॥ स्वाम्यतुल्यकृपादंडो हीनोत्कृष्टैकसत्प्रियः ॥५१॥ स्वपक्षादिन्यायदर्शी
हीनार्थाधिकसाधकः ॥ व्याधव्याधानुचितकृत्तारकोऽखिलतुल्यकृत् ॥५२॥ पार्थ्व
त्याधिकमुक्तात्माप्रियात्यकृत्स्मरारिजित ॥ साक्षात्कुशलवच्छद्मेंद्राग्नितातो
परजितः ॥५३॥ कौशलेंद्रो वीरबाहुः सत्यार्थत्यक्तसोदरः ॥ शरसंधाननिर्धूत
धरणीमंडलोदयः ॥५४॥ ब्रह्मादिकाम्यसान्निध्यसनाथीकृतदेवतः ॥ ब्रह्म
लोकाप्तचांडालाद्यशेषप्राणिसार्थपः ॥५५॥ स्वर्णीतगर्दभाश्वादिश्चिरायो
ध्यावनैककृत् ॥ राम द्वितीयः सौमित्रिर्लक्ष्मणः प्रहतेंद्रजित ॥५६॥ विष्णु

भक्तांशरणामंत्रिपादुकाराज्यनिर्वृतः ॥ भरतो मत्स्यगंधर्वः कोटिब्रह्मांलवणां
तकः ॥ ५७ ॥ शत्रुघ्नो वैद्यराडायुर्वेदगर्भौषधीपतिः ॥ नित्यामृतकरो धन्वन्त
रिर्यज्ञो जगद्धरः ॥ ५८ ॥ सूर्यारिघ्नः सुराजीवो दक्षिणेशो द्विजप्रियः ॥ छिन्न
मूर्द्धापदेशाङ्गः शेषांशः स्थापितामरः ॥ ५९ ॥ विश्वार्थाशेषकृद्दार्थशि
।१४। रच्छेदाकृताकृतिः ॥ वाजपेयादिनामाग्निर्वेदधर्मपरायणः ॥ ६० ॥ श्वेतद्वी ।१४।
पपतिः सांख्यप्रणेता सर्वसिद्धिदः ॥ विश्वप्रकाशितज्ञानयोगमोहतमिस्र
हा ॥ ६१ ॥ देवहूत्यात्मजः सिद्धः कपिलः कर्दमात्मजः ॥ योगस्वामी ध्यानभं
गसंगरात्माजभस्मकृत ॥ ६२ ॥ धर्मो वृषेंद्रः सुरभीपतिः शुद्धात्मभावितः ॥

शंभुस्त्रिपुरदाहकः स्थैर्यो विश्वरथो दहः ॥६३॥ मन्त्रेशं भुजितो दैत्यः मतन्वापी
समस्तपः ॥ महाप्रलयविशेषको द्वितीयो विलनागराट् ॥६४॥ शेषदेवः महा
सहस्रः महस्रांघ्रिशिरोभुजः ॥ फणामणिकणाकारं योज्ञिताच्यंबुदक्षितिः
॥६५॥ कालाग्निरुद्रजनको मुसलास्त्रो हलायुधः ॥ नीलांबरो वारुणीशो
मनोवाक्कायदोषहा ॥६६॥ वस्त्रसंतोषो दृष्टिमात्रपातितैकदशाननः ॥
वलिसंयमनो घोरो रौहिणेयः प्रलंबहा ॥६७॥ मुष्टिकघ्नो द्विविदहा कालि
लिंदीभेदनो वलः ॥ रेवतीरमणः पूर्वभक्तिखेदाच्युताग्रजः ॥६८॥ देवकी
वसुदेवाह्वकश्यपादितिनंदनः ॥ वार्ष्णेयः सात्वतां श्रेष्ठः शौरिर्यदुकुलोद्वहः ॥६९॥

नारात्मूतिपरं ब्रह्मसर्वसाक्षिवरप्रदः ॥ ब्रह्मादिकाम्यलालित्यजगदाश्चर्यशै-
शवः ॥७०॥ पूतनाघ्नः शकटभिद्यमलार्जुनभंजनः ॥ वातासुरारिः केशिघ्नो धे
नुकारिर्गवीश्वरः ॥७१॥ दामोदरो गोपदेवो यशोदानंदकारकः ॥ कालीयमर्द्द
नः सर्वगोपगोपीजनप्रियः ॥७२॥ लीलागोवर्द्धनधरो गोविंदो गोकुलोत्स
॥१५॥ वः ॥ अरिष्टमथनः कामोन्मत्तगोपीविमुक्तिदः ॥७३॥ सद्यः कुवलयापीड ॥१५॥
घाती चाणूरमर्द्दनः ॥ कंसारिरुग्रसेनादिराज्यव्यापारितामरः ॥७४॥ सुध
र्माङ्कितभूर्लोको जरासंधबलांतकः ॥ त्यक्तभग्नजरासंधो भीमसेनयशःप्र
दः ॥७५॥ सांदीपनिमृतापत्यदाता कालांतकादिजित् ॥ समस्तनारकित्राता

तासर्वभूपतिकोटिजित ॥७६॥ रुक्मिणीरमणोरुक्मिशासनोनरकांतकः
समस्तसुंदरीकांतोमुरारिर्गरुडध्वजः ॥७७॥ एकाकीजितरुद्रार्कमरुदाद्य
खिलेश्वरः ॥ देवेंद्रदर्पहाकल्पद्रुमालंकृतभूतलः ॥७८॥ बाणबाहुसहस्र
च्छिन्नंद्यादिगणकोटिजित ॥ लीलाजितमहादेवोमहादेवैकपूजितः ॥७९॥
इंद्रार्थार्जुननिर्भंगःजयदःपांडवैकधृक् ॥ काशिराजशिरश्छेत्तारुद्रशक्त्यै
कमर्दनः ॥८०॥ विश्वेश्वरप्रसादाढ्यःकाशिराजसुतार्दनः ॥ शंभुप्रति
ज्ञाविध्वंसीकाशीनिर्दग्धनायकः ॥८१॥ काशीशगणकोटिघ्नोलोकशिक्षा
द्विजार्च्चकः ॥ युवतीव्रतपोवश्यःपुराशिववरप्रदः ॥८२॥ शंकरैकप्रतिष्ठा

ध्टकेतोशशंकरपूजकः॥ शिवकन्याव्रतपतिः कृष्णानृपशिवारिहा॥८२
मल्लानांलक्ष्मीवपुर्गौरी ज्ञातावेदत्वत्रहृ॥स्व धाममुमुक्षुकेदैकलिंकालय
वनेस्थकृत॥८३॥यमुनापतिरानीतपरिलीनद्विजात्मजः श्रीदामरंक
भक्तार्थभूम्यानीतेंद्रवैभवः॥८४॥दुर्वृत्तशिशुपालैकमुक्तिदोद्वारके
॥१६॥ श्वरः॥आचांडालादिकप्राप्यद्वारकानिधिकोटिकृत॥८५॥अक्रूरो ॥१६॥
द्धवमुख्यैकभक्तस्वच्छंदमुक्तिदः॥सबालस्त्रीजलक्रीडामृतवापीकृतार्ण
वः॥८६॥ब्रह्मास्त्रदग्धगर्भस्थपरीक्षिज्जीवनैकदः॥परीलीनद्विजसुताने
तार्जुनमदापहः॥८७॥गूढमुद्राकृतिग्रस्तभीष्माद्यखिलकौरवः॥

पार्थार्थखंडिताशेषदिव्यास्त्रः पार्थमोहहृत् ॥ ८९ ॥ गर्भशापकुलध्वं
स्तयादवोर्वीभरापहः ॥ जराव्याधारिगतिदः स्मृतमात्राखिलेष्टदः ॥ ९० ॥
कामदेवो रतिपतिर्मन्मथः शंबरांतकः ॥ अनंगो जितगौरीशो रतिकांतः स
देप्सितः ॥ ९१ ॥ पुष्पेषुर्विश्वविजयी स्मरः कामेश्वरीप्रियः ॥ ऊषापतिर्वि
श्वकेतुर्विश्वदृप्तोधिपूरुषः ॥ ९२ ॥ अनिरुद्धो विहद्धृत्यप्रद्युम्नो विश्व
मोहनः ॥ चतुरात्मा चतुर्वर्णश्चतुर्युगविधायकः ॥ ९३ ॥ चतुर्वेदैक
विश्वात्मा सर्वोत्कृष्टांशकोटिसूः ॥ आश्रमात्मा पुराणर्षिर्व्यासः शाखा
सहस्रकृत ॥ ९४ ॥ महाभारतनिर्माता कवीन्द्रो बादरायणः ॥ कृष्णद्वै

पायनः सर्व्वपुरुषार्थैकबोधकः ॥ ९५ ॥ वेदान्तकर्त्ता ब्रह्मैकव्यंजकः
पुरुवंशकृत् ॥ बुद्धो ध्यानजिताशेषदेवदेवीजगत्प्रियः ॥ ९६ ॥ निरायुधो
जगज्जैत्रः श्रीधनो दुष्टमोहनः दैत्यवेदबहिःकर्त्ता वेदार्थश्रुतिगोपकः
॥ ९७ ॥ शौद्धोदनिर्दृष्टदिष्टः सुखदः सदसत्पतिः ॥ यथायोग्यखिल
॥ १७ ॥ कृपः सर्व्वशून्यो विकल्पदः ॥ ९८ ॥ चतुःकोटिपृथक्तत्त्वप्रज्ञापारमि ॥ १७ ॥
तेश्वरः ॥ पाखण्डवेदमार्गेशः पाखण्डश्रुतिगोपकः ॥ ९९ ॥ कल्कीवि
ष्णुयशःपुत्रः कलिकालविलोपकः ॥ समस्तम्लेच्छदुष्टघ्नः सर्वशिष्ट
द्विजातिकृत् ॥ १०० ॥ सत्यप्रवर्त्तको देवद्विजदीर्घक्षुधापहः ॥ अश्व

कारादिरेवंतः पृथ्वी दुर्गतिनाशनः ॥ २० ॥ स्वच्छः दैमी नंतलक्ष्मी कृतक्ष
निःशेषधर्मकृत ॥ अनंतस्वर्णयागो केहेमपूर्णारिव लोद्विजः ॥ १ ॥ अमा
च्येकतनगद्धारस्ताविरववं चोजगद्गुरुः ॥ आत्माततत्वाधिपः कर्तश्रेष्ठोवि
धिरुमापतिः ॥ ३ ॥ भर्तश्रेष्ठः प्रजेशाग्र्योमरीचिर्जुनकाग्रणीः । कश्यपो
देवराडिंद्रः प्रह्लादो दैत्यराट् शशी ॥ ४ ॥ नक्षत्रेशो रविस्तेजः श्रेष्ठः शु
क्रः कवीश्वरः ॥ महर्षिराड्गुरुर्विष्णुरादित्येशो वलिः स्वराट् ॥ ५ ॥ वायु
र्वह्निः शुचिः श्रेष्ठः शंकरो रुद्रराड्गुरुः ॥ विद्धत्तमस्त्विन्नरथो गंधर्वोस्या
दुत्तमः ॥ ६ ॥ वर्णादिर्युग्मात्मा गौरीशाक्राम्याश्वीश्वनारदः ॥ देवर्षि

राट्पांडवाग्र्योर्जुनोवादःप्रवादराट्॥७॥पवनःपवतेमास्मीवरूरामोयाद

सांपतिः॥गंगातीर्थोत्तमोद्युतंछलकाग्र्येवरौषधम्॥८॥स्त्रन्मृत्युर्दर्शितोस्त्रा

ग्र्यवज्रप्रहरणोत्तमो॥उच्चैःश्रवाचवाजिराजऐरावतइभेश्वरः॥९॥स्मरःप्र

जेपकपत्नीशोत्थस्वस्त्याश्रेशषष्टदराट्॥ अध्यात्मविद्याविद्यानामाःप्रणव

॥१८॥ केदसोवरः॥१०॥मरुगिरिपतिर्मेरोर्मासमार्गःकालस्तनमः॥दिनाद्यात्मा ॥१८॥

पूर्वसिद्धःकपिलःसामवेदराट्॥११॥लाहल्यःस्वर्गेंद्रोश्वत्थ्योवसंतःक

ल्पपादपः॥दात्रश्रेष्ठःकामधेनुरार्तिघ्नोग्र्यःमुक्ततमः॥१२॥चिंतामणि

गुरुश्रेष्ठोमाताहिततमःपिता॥सिंहोमृगेंद्रोनागेंद्रोवासुकिर्न्नवरोनृपः॥१३॥

वर्णै शोभास्मरणमृतः करालाग्रीन मो नमः ॥ इत्येतद्वासुदेवस्य विष्णोर्नाम
सहस्रकं ॥ १४ ॥ सर्वपापप्रशमनं परं भक्तिविवर्द्धनं ॥ स्वहृदयं ब्रह्मलोकादि स
र्वस्वर्गैकसाधनं ॥ १५ ॥ विष्णुलोकैकसोपानं सर्वदुःखविनाशनं ॥ समस्तसु
३५ खदं सद्यः परं निर्वाणदायकं ॥ १६ ॥ कामक्रोधादिभिः शोधमनोमलवि
शोधनं ॥ शांतिदं पावनं नृणां महापातकिनामपि ॥ १७ ॥ सर्वेषां प्राणिना
माशु सर्वाभीष्टफलप्रदम् ॥ सर्वविघ्नप्रशमनं सर्वारिष्टविनाशनम् ॥ १८ ॥
घोरदुःखप्रशमनं सर्वारिष्टविनाशनम् ॥ घोरदुःखप्रशमनं तीव्रदा
द्र्यनाशनं ॥ १९ ॥ ऋणत्रयापहं गुह्यं धनधान्ययशस्करं ॥ सर्वैश्व

रो.३

र्थप्रदं सर्वसिद्धिदं सर्व्वधर्म्मदं ॥ २० ॥ तीर्थयज्ञतपोदानं व्रतकोटिफल
प्रदम् ॥ जगज्जाड्यप्रशमनं सर्व्वविद्याप्रवर्त्तकं ॥ २१ ॥ राज्यदं भ्रष्टराज्या
नां रोगिनां सर्वरोगकृत ॥ वंध्यानां सुतदं चाप्युदीरणं जीवितप्रदं ॥ २२
भूतग्रहविषध्वंसी ग्रहपीडाविनाशनं ॥ मांगल्यं पुण्यमायुष्यं श्रवणा
॥ १९ ॥ त्पठनाज्जपात ॥ २३ ॥ मत्कृदस्याविल्लावेदाः सांगा मंत्रास्त्व कोटिशः ॥ पुरा ॥ १९ ॥
णशास्त्रस्मृतयः श्रुतास्युः पठितास्तथा ॥ २४ ॥ जप्त्वास्यैकाक्षरं श्लो
कपादं वा पठतः प्रिये ॥ नित्यं सिद्ध्यति मंत्रं छमचिरात्सि स्मृताखिलं ॥ २५ ॥
नानेन सदृशो मन्त्रः प्रत्ययं सर्व्वकर्म्मसु ॥ इदं महेशलयागोप्यं पाठं स्त्वा

पैकसिद्धये ॥२६॥ नादैष्णवाय दातव्यं विकल्पोपहतात्मने ॥ भक्तिश्रद्धा
विहीनाय विष्णुसामान्यदर्शिने ॥२७॥ देयं पुत्राय शिष्याय सुहृदे हितका
म्यया मन्त्रप्रसादाद्दत्ते ते देयं ग्रहीष्यन्त्यल्पमेधसः ॥२८॥ कलौ महाफलं के
ल्पग्रामं नेष्यति नारदः ॥ लोकानां भाग्यहीनानां येन दुःखं विनश्यति ॥२९॥
हित्वा पूर्वैष्णवेष्वेतदार्यवर्ते भविष्यति । नास्ति विष्णोः परं मन्त्रं नास्ति विष्णोः
परं तपः ॥३०॥ नास्ति विष्णोः परं स्थानं नास्ति विष्णोः परं पदं । नास्ति विष्णोः
परं ज्ञानं नास्ति विष्णोः परं जपः ॥३१॥ नास्ति विष्णोः परं ध्यानं नास्ति वि
ष्णोर्मन्त्रमेवैष्णवं । किं तस्य बहुभिर्मन्त्रैः शास्त्रैः किं बहुविस्तरैः ॥३२॥ वा

१०

जपेयस्सहस्रैर्वा भक्तिर्यस्य जनार्द्दने ॥ सर्वतीर्थमयो विष्णुः सर्वशास्त्रमयः
प्रभुः ॥२३॥ सर्वक्रतुमयो विष्णुः सत्यं सत्यं वदाम्यहं ॥ आब्रह्मस्तम्बसारः सर्वस्त्वे-
सत्यमेतन्मयोदितं ॥२४॥ श्रीपार्वत्युवाच ॥ धन्यास्म्यनुगृहीतास्मि कृ-
तार्थास्मि जगत्प्रभो ॥ यन्मयेदं श्रुतं पूर्वं तव देहस्थं सुदुर्लभं ॥२४॥ श्र-
होऽव्रतमहं तत्कष्टं मम सत्सुखदेहरो ॥ विद्यमानेपि सर्वेशो मृताः क्लिश्यं-
ति संहृते ॥२५॥ यमुद्दिश्य सदा नाथो महेशोपि दिगंबरः ॥ जटिलो भस्म-
लिप्तांगस्तपस्वी वीक्ष्यते जनैः ॥२६॥ ततोधिकोस्ति को देवो लक्ष्मीकांता-
न्मधुद्विषः ॥ यत्तत्त्वं चिंत्यते नित्यं त्वया योगेश्वरेण हि ॥२७॥ ततः परां किं-

१०

म्यधिकं पदं श्रीपुरुषोत्तमात॥ तमविज्ञाय केप्युच्चा भजंते ज्ञानमानिनः॥ ३८॥
मुखितास्मितं यानाथ्य चिरियदप्यमीश्वरः॥ प्रकाशितोत्तमे यस्याः त्वदाद्यो
दिव्याशक्तयः॥ ३९॥ अहो सर्वेश्वरो विभुः सर्वदेवोत्तमोत्तमः॥ भवदादि
गुरुमूढैः सामान्य इव वीक्ष्यते॥ ४०॥ महीयसां हि माहात्म्यं भजमानानामे
जंतिये द्विषतोपि तथा पापानुपद्रुते कृपया मया॥ ४१॥ मयापि बाल्ये स्वे
पि[illegible]तुः प्रजाहं स्वानुमुक्तिता दुःखादशाक्ताः संपोष्टुं श्रियान ध्यासिताः
पुरा॥ ४२॥ तथा संविहिता स्वस्वप्रजाभ्यो भवदादयः॥ विलसंति मशाक्ता
ध्याः समुद्रनिस्त्रवो धवाः॥ ४३॥ तया विना को देवतैवै कैश्वर्यैकपरि

२१ ग्रहः॥ सर्वं प्रकृतिजीवं तो यातनाखिलं संस्थिता॥८४॥ तामृते नैव धर्म-
र्थमोक्षकामसमोत्को हि दुरतः॥ क्षुधितानां दुर्गतानां कुतो योगसमाधयः
॥८५॥ स च संसारसारैकः सर्वलोकैकनायकः॥ यशोगाकमलायस्य त्व
त्वानामपि शंकरः॥८६॥ कृष्णोऽकृत्येन शोचेनतूपेणार्जुनं समपदा॥ सर्वे
तिशापि वीर्येण संपूर्णास्य महात्मनः॥८७॥ कस्तेन तुल्यतामेति देवदे
वेन विष्णुना॥ यस्यांशांशावतारेण विनाऽसद्यो विलीयते॥८८॥ जगदेत
तथा ध्यान कृर्देशे धार्येतद्धि मोहिता॥ नास्ति जन्म जरामृत्यु तां प्राप्यास्त्वा
र्थमेव च॥८९॥ कामाद्यासक्तचित्तानां किं तु सर्वेश्वरप्रभोरतिन्मयतां २१

स्य मेदाद्वाशक्तोसिपठितुंनत्वेत्य ॥ ५० ॥ विष्णोःसहस्त्रनामैतत्प्रत्यहं
वृषभध्वजः ॥ नाम्नैकेनतुयेनः ॥ स्यात्तत्फलंवद
२२ हिमेप्रभो ॥ ५१ ॥ श्रीमहादेवउवाच ॥ रामरामे २२
तिरामेतिर मेरामेमनो रमेसहस्त्र
नामतत्तु त्यंश्रीराम नामवरा
नने ॥ ५२ ॥ इतिश्रीपद्म पुराणेउत्त
रखंडेउमामहेस्वरसंवादेविष्णुर्नामसहस्त्रसमाप्तंसुभमस्तु ॥
जथाप्रतितथालिखितंश्रीगुसाइवालवनतज् श्रीवासुदेवपठनार्थं ॥ ॥